त्रवे। प्रागेव मुक्तिः संसिद्धा गङ्गा—सङ्गात्ततोऽधिका। यदाप्रभृति सा गङ्गा मणिकर्णीं समागता। तदाप्रभृति तत् क्षेत्रं दुष्प्रापं त्रिदशैरपि। कृत्वा कर्म्माण्यनेकानि कल्याणानीतराणि च। तानि क्षणात् समुत्क्षिप्य काशीसंस्थोऽन्ततो भवेत्। तस्य वेदान्तवेद्यस्य निदिध्यासनतो विना। विना साङ्ख्येन योगेन काश्यां संस्थोऽन्ततो भवेत्। कर्म्मनिर्म्मूलनकृता विना ज्ञानेन कुम्भज!। शशिमौलिप्रसादेन काश्यां संस्थोऽन्ततोभवेत्। यत्नतोऽयत्नतो वापि कालात् त्यक्त्वा कलेवरम्। तारकस्योपदेशेन काशीसंस्थोऽन्ततो भवेत्। अनेकजन्मसंसिद्धैर्बद्धोऽपि प्राकृतैर्गुणैः। असिसंभेदयोगेन काशीसंस्थोऽन्ततो भवेत्। देहत्यागोऽत्र वै दानं देहत्यागोऽत्र वै तपः। देहत्यागोऽत्र वै योगः काश्यां निर्व्वाणसौख्यकृत्। प्राश्चीत्तरवहां काश्यामपि दुष्कृतवानपि। यायात् स्वं हेलया त्यक्त्वा तद्विष्णोः परमं पदम्। महेन्द्राग्निमुखा देवा दृष्ट्वा मुक्तिपथोन्मुखान्। सर्व्वान् सर्व्वेशमालोक्य रक्षाञ्चक्रुः पुरा पुरः। असिन्महासिरूपाञ्च पापिसङ्घातखण्डिनीम्। दुष्टप्रवेशं धुन्वानां मुनीं देवा विनिर्म्ममुः। वरणाञ्च व्यधुस्तत्र क्षेत्रविघ्ननिवारिणीम्। दुर्वृत्तस्य प्रवृत्तेश्च निवृत्तिकरणीं सुराः। दक्षिणोत्तरदिग्भागे कृत्वासिं वरणां सुराः। क्षेत्रस्य मोक्षनिःक्षेपरक्षां निर्वृतिमाययुः। क्षेत्रस्य पश्चाद्दिग्भागे तं देहलिविनायकम्। स्वयं व्यापारयामास रक्षार्थं शशिशेखरः। अनुज्ञातप्रवेशानां विश्वेशेन कृपावताम्। ते प्रवेशं प्रयच्छन्ति नान्येषां हि कदाचन”। अत्रार्थे प्राचीनेतिहासमुक्त्वा माहात्म्यादिकमुक्तं यथा—“एवं काश्यां प्रविशन्नपि पापी धर्म्मानुषङ्गतः। न क्षेत्रफलमाप्नोति बहिर्भवति तत्क्षणात्। तस्माद्विश्वेश्वरानुज्ञैव काशीवासेऽत्र कारणम्। असिश्च वरणा यत्र क्षेत्ररक्षाकृतौ कृते। वाराणसीति विख्याता तदारभ्य महामुने!। असेश्च वरणायाश्च सङ्गमं प्राप्य काशिका। वाराणसीह करुणामयदिव्यमूर्त्तिरुत्सृज्य यत्र तु तनुं तनुभृत् सुखेन। विश्वेशशङ्करमहसि यत् सहसा प्रविश्य रूपेण तां वितनुतापदवीन्दधाति। जातो मृतो बहुषु तीर्थवरेषु रे त्वं जन्तो! न जातु तव शान्तिरभून्निमज्ज्य। वाराणसीति गदतीह मृतोऽमृतत्वं प्राप्याधुना मम बलात् स्मरशासनः स्याः। अन्यत्र तीर्थसलिले पतितो द्विजन्मा देवादिभावमयते न तथा तु काश्याम्। चित्रं यदत्र पतितः पुनरुत्थितं न प्राप्नोति पुक्कशजनोऽपि किमग्रजन्मा। सैषा पुरी संसृतिरूपपारावारस्य पारं पुरुषः पुरारिः। यस्यां परं पौरुषमर्थमिच्छन् सिद्धिं नयेत् पौरपरम्परासः। तीर्थान्तराणि मनुजः परितोऽपगाह्य हित्वा तनुं कलुषितां, दिवि दैवतं स्यात्। वाराणसीपरिसरे तु विसृज्य देहं सन्देहभाग्भवति देहलवाप्तयेऽपि। वाराणसी शमवशीकरणादृतेऽपि योगादयोगिजनताञ्जनतापहन्त्री। तत्तारकं श्रवणगोचरतां नयन्ती तद्ब्रह्म दर्शयति येन पुनर्भवो न। वाराणसीपरिसरे तनुमिष्टदात्रीं धर्म्मार्थसौख्यनिलयामिह हा विसृजन्। दृष्टं पदं किमपि हृष्टतरोऽभिलाष्यलाभोऽस्तु मूलमपि नो यदवाप शून्यम्। आः काशिराशिजनता ननु वञ्चिताभूद्भालेविलोचनवता वनितार्द्धभाजा। आदाय यत् सुकृतभाजनमिष्टदेहं निर्वाणमात्मपवर्जयताऽपुनर्भु। वाराणसी स्फुरदसीमगुणैकभूमिर्यत्र स्थितास्तनुभृतः शशिभृत्प्रभावात्। सर्वे गलेगरलिनोऽक्षियुजो ललाटे, वामार्द्ध,वामतनवोऽतनवस्ततोऽन्ते। आनन्दकाननमिदं सुखदं पुरैव तत्रापि चक्रसरसी मणिकर्णिकाऽथ। स्वःसिन्धुसङ्गतिरथोपरमास्पदञ्च विश्वेशितुः किमिह तन्न विमुक्तये यत्। वाराणसीह वरणासिसरिद्वरिष्ठासंभेदखेददमनी द्युनदीलसच्छ्रीः। विश्रामभूमिरचलामलमोक्षलक्ष्म्या हैनां विहाय किमु सीदति मूढजन्तुः। किं विस्मृतं त्वहह गर्भजमामनस्यं कार्त्तान्तदूतकृतबन्धनताड़नं वा। शम्भोरनुग्रहपरिग्रहलभ्यकाशीं मूढो विहाय किमु याति करस्थमुक्तिम्। तीर्थान्तराणि कलुषाणि वहन्ति सद्यः श्रेयोद्भवन्त्यपि बहु त्रिदिवं नयन्ति। पानावगाहनविधानतनुप्रहाणैर्वाराणसी तु कुरुते बत मूलनाशम्। काशीपुरीपरिसरे मणिकर्णिकायां त्यक्त्वा तनुं तनुभृतस्तनुमाप्नुवन्ति। भालेविलोचनवतीं गलनीललक्ष्मीं वामार्द्धबन्धुरवधूं विबुधैकराध्याम्। ज्ञात्वा प्रभावमतुलं मणिकर्णिकाया यत् पुद्गलन्त्यजति चाशुचि पूयगन्धि। स्वात्मावबोधमहसा सहसा मिलित्वा कल्पान्तरेष्वपि स नैव पृथक्त्वमेति। रागादिदोषपरिभूतमनोहृषीकाः काशीपुरीमतुलदिव्यमहाप्रभावाम्। ये कल्पयन्ति परतीर्थसमां समन्तात्ते पापिनो न सह तैः परिभाषणीयम्। वाराणसीं स्मरहरप्रियराजधानीं त्यक्त्वा कुतो व्रजसि मूढ! दिगन्तरेषु। प्राप्याप्यजाड्यमु-